उपशास्त्री-II साहित्य तृतीय पत्रम

किरातार्जुनीयम् महाकाव्यम् -प्रथमः सर्गः

प्र०(1) पद्यमिदम् व्याख्येयम ।

अथ क्षमामेव निरस्तविक्रमश्चिराय पर्येषि सुखस्य साधनम् ।
विहाय लक्ष्मीपतिलक्ष्म कार्मुकं जटाधरः सञ्जुहुधीह पावकम् ॥

उत्तरम्— प्रसंगः— प्रस्तुतोऽयं श्लोकः महाकवि भारवि विरचितस्य किरातार्जुनीयमहाकाव्यस्य प्रथमसर्गात उद्धृतोऽस्ति ।

अस्मिन् श्लोके द्रौपदी युधिष्ठिरं प्रति कथयति— यदि पराक्रमं निरस्य चिराय शान्तिमेव कल्याणसाधनम् इति मन्यसे चेत् तर्हि राजचिन्हेनानेन धनुषा किम्। एतत् परित्यज्य जटां धारयन् अस्मिन्नेव वने मुनिर्भूत्वा होमं कुरु।

व्याख्या:— अथ = पक्षान्तरे । (निरस्तः विक्रमो येन सः) निरस्तविक्रमः =(उत्साहहीनः) सन् चिराय = चिरकालेनापि । क्षमां = शान्तिमेव सुखस्य साधनं पर्येषि = अवगच्छसि, तर्हि ( लक्ष्म्याः पतिः, तस्य लक्ष्म, तत् ) लक्ष्मीपतिलक्ष्म = राजचिन्हं कार्मुकं = धनुः विहाय = त्यक्त्वा, धरतीति धरः । पचाद्यच् जटानां धरः जटाधरः सन् । इह = वने । पावकं जुहुधि = पावके होमं कुर्वित्यर्थः। अधिकरणे कर्मत्वोपचारः। विरक्तस्य किं धनुषेत्यर्थः हुकल्प्योः हेर्धिः।

Renu Devi
21/12/20
राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।

शास्त्री-II साहित्य

सूक्तिव्याख्याभागः मेघदूतम् - पूर्वमेघः

प्र० (1) "के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः" ॥

उत्तरम् - प्रसंगः - व्याख्या:- इयं सूक्तिः महाकविकालिदासप्रणीतस्य मेघदूतस्य खण्डकाव्यस्य पूर्वमेघस्यास्ति। अत्र महाकविः कार्यारम्भं कृत्वा ये केचिद् हेतुभिः तत्प्रपूरणेऽक्षमाः भवन्ति ते लोके निन्दाभाजो भवन्तीति वर्णयन्नाह "के वा न स्युः" इति।

हे मेघ! तत्र हिमालये शरभाणामुड्डयनमार्गं व्यजन्तमपि भवन्तं लङ्घयितुं ये शरभाः प्रयतेरन्, तान् वर्षोपलविक्षिप्तान् विनष्टांश्च कुर्वन् मम सन्देशं यथोक्तं मम विरहिणीं पत्नीं प्रापय। यतो हि निष्फलारम्भयत्नाः = विफलकर्मप्रयासाः, के वा = केऽपि जनाः, परिभवपदम् = तिरस्कारपात्रं न स्युः = न भवेयुः। अर्थात् सर्वेऽपि निष्फलकर्माणः जनाः तिरस्कारपात्रत्वं यान्त्येव।

Renu Devi
02/12/20

रघ्वा उमाकान्त सं० महावि० सुखसेना, पूर्णिया।

उपशास्त्री - I साहित्य तृतीय - पत्रम्

किरातार्जुनीयम् - महाकाव्यम्

प्रथमः सर्गः

Date ___/___/____

प्र० 1 - पद्यमिदम् व्याख्येयम् ।

सुखेन लभ्या दधतः कृषीवलैरकृष्टपच्या इव सस्यसम्पदः ।
वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन्कुरवश्चकासति ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि भारवि विरचितस् किरातार्जुनीय महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति।

अस्मिन् श्लोके वनेचरः युधिष्ठिरं प्रत्युवाच दुर्योधनः चिराय प्रजापालन तत्परः सस्यवृद्ध्यर्थं कृत्रिम नदी (नहर) प्रभृत्युपायैः सेचनोद्योगं विधाय एवं कारयत् तत्रत्याः कृषकाः विना प्रयासेनैव स्वयं जातानीव सस्यानि लेभिरे ।

व्याख्या :- चिराय = बहुत समय से, तस्मिन् = उस दुर्योधन के, क्षेमं वितन्वति (सति) = (प्रजाओं का) कल्याण कारक होने पर, अदेवमातृकाः = जो बादलों के पानी से नहीं जाते ऐसे, कुरवः = कुरुदेश, कृषीवलैः = किसानों द्वारा सुखेन = आसानी से, लभ्याः = पाने योग्य, सस्यसम्पदः धान्य सम्पत्तियों को, दधतः = धारण करते हुए, चकासति = शोभित हो रहे हैं।

Renu Devi
21/12/20

राधा उमाकान्त सं० महा० वि० सुखसेना, पूर्णिया

शास्त्री-I साहित्य
अभिज्ञानशाकुन्तलम्

Date __/__/____

प्र०(1) पद्य मिदम् व्याख्येयम् ।

दर्भांकुरेण चरणः क्षत इत्यकाण्डे
तन्वी स्थिता कतिचिदेव पदानि गत्वा ।
आसीद् विवृत्तवदना च विमोचयन्ती
शाखासु वल्कलमसक्तमपि द्रुमाणाम् ।।

उत्तरम्- प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि कालिदास विरचितस्य अभिज्ञान शाकुन्तलम् नाट्यशास्त्रस्य द्वितीय अंकात् उद्धृतोऽस्ति । अस्मिन श्लोके शकुन्तलाया भावाविष्करणप्रकारं वर्णयन् राजा दुष्यन्तो विदूषकं कथयति -

व्याख्या - तन्वी = स्वभावतः कृशाङ्गी शकुन्तला कतिचित् = कानिचित् एव द्विप्राण्येव, पदानि = पदप्राप्यस्थानानि गत्वा = चलित्वा, अकाण्डे = अनवसरे एव दर्भस्य = कुशस्य अङ्कुरेण = अग्रभाग सूच्या कुशाग्र-सूचिकया चरणः = मम पादः क्षतः = सव्रणः विद्ध, इत्युक्त्वा = इति हेतुमभिनीय वा विवृत्तवदना = विवृतं = प्रत्यावृत्तं वदनं = मुखं यया सा विवृत्तवदना = वदनं विवृत्य विलोकयन्ती मत्संमुखीना द्रुमाणां = वृक्षाणां शाखासु = स्कन्धेषु, विटपेषु असक्तं = अलग्नम्, असं-बद्धमपि वल्कलं = परिधानीयं वल्कलवस्त्रं, विमोचयन्ती = मन्दंमन्दं मोचनव्यापारमभिनयन्ती, स्थिता = अवस्थिता आसीत् । कुशाग्रभागपादव्यथनाभावेऽपि तद्व्याजेन वल्कलस्य शाखा-स्वनासक्तस्यापि विमोचनच्छलेन निरुद्धगमना स्वाशयं स्पष्ट-मेव प्रकटितवतीति भावः । अत्र विरोधाभासविभावना-हेतु-व्याजोक्ति-स्वभावोक्ति-वृत्त्यनुप्रास-छेकानुप्रासा अलङ्कारा वसन्ततिल-का वृत्तं च ।

Renu Devi
02/12/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

Page No.